मन्त्रः। २तीक्ष्णधारायुक्तमात्रे त्रि०। "नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निशितस्तीक्ष्णधारः। तदुभयमेतद्विपरीतं क्षत्रियस्य वाङ्नवनीतं हृदयं तीक्ष्णधारमिति" भा० आदि० ३ अ०।

**तीक्ष्णपत्र** पु० तीक्ष्णानि पत्राण्यस्य। १तुम्बुरुवृक्षे राजनि०। २तीव्रपत्रयुक्ते त्रि० कर्म्म०। ३तीक्ष्णे पत्रे न०।

**तीक्ष्णपुष्प** न० तीक्ष्णं पुष्पमस्य। १लवङ्गे।२केतक्यां स्त्री टाप्। राजनि०। ३तिग्मपुष्पयुक्ते त्रि०। कर्म्म०। ४तिग्मे पत्रे न०।

**तीक्ष्णफल** पु० तीक्ष्णं फलमस्य। १तुम्बुरुवृक्षे राजनि०। २तिग्मफलयुक्ते त्रि० कर्म्म०। ३तिग्मे फले न०।

**तीक्ष्णमूल** पु० तीक्ष्णं मूलमस्य। १शोभाञ्जने २कुलञ्जने च राजनि०। ३तिग्ममूलके त्रि०। कर्म्म०। ४तिग्मे मूले न०।

**तीक्ष्णरश्मि** पु० तीक्ष्णा रश्मयोऽस्य। तिग्मांशौ १सूर्य्ये "शरत्प्रज्वलितं तेजस्तीक्ष्णरश्मिर्विशोषयन्" हरिवं० ७३० अ०।२तिग्मरश्मियुक्ते त्रि०। कर्म०।३तिग्मे रश्मौ पु०

**तीक्ष्णरस** पु० तीक्ष्णो रसोऽस्य। १यवक्षारे रत्नमा०। २तिग्मरसयुक्ते त्रि०। कर्म्म०। ३तिग्मे रसे पु०।

**तीक्ष्णलौह** न० नि० कर्म्म०। (इस्पात) लौहभेदे।

**तीक्ष्णशूक** पु०तीक्ष्णः शूकोऽग्रं यस्य। १यवे। २खरशूकयुक्ते त्रि०। कर्म्म०। ३खरे शूके पु० न०।

**तीक्ष्णसारा** स्त्री तीक्ष्णः कठिनः सारोऽस्याः। १शिंशपायाम् (शिशु) राजनि०। २तिग्मसारयुक्ते त्रि० कर्म्म०। ३खरे सारे पुंन०।

**तीक्ष्णा** स्त्री तीक्ष्ण+टाप्। १वचायां २सर्पकङ्कालिकायाम् रत्नमा०३कपिकच्छ्वां ४महाज्योतिष्मत्याम् ५अत्यम्लपर्ण्याम् जटा०। ६ताराद्देव्याम् च। उग्रतारोपक्रमे "हे भगवत्येकजटे विद्महे पद्मन्ततः। विकटदंष्ट्रे धीमहि तन्नस्तारा प्रचोदयात्। एषा तु तीक्ष्णा गायत्री पीठदेव्याः प्रकीर्त्तिता"। "पानेषु मदिरा शस्ता नरो बलिषु पार्थिव!। मोदको नारिकेलञ्च मांसं व्यञ्जनमेव च। नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः १। कालि०पु० ८२ अ०।

**तीक्ष्णायस** न० नि० कर्म्म० अच् समा०। लौहभेदे (इस्पात) राजनि०। [तितीम।

**तीम** क्लेदने दिवा० पर० अक० सेट्। तीम्यति अतीमीत्।

**तीर** पारगतौ कर्म्मसमाप्तौ च अद० चुरा० उभ० अक० सेट्। तीरयति ते अतितीरत् त।

**तीर** न० तीर–अच्। नद्यादेः १कूले। २सीसके पु० अमरः। ४वाणे पु० त्रिका०। ५त्रपुणि पु० मेदि०। "सार्द्धहस्तशतं यावत् गर्भतस्तीरमुच्यते। भाद्रकृष्णचतुर्दश्यां यावदाक्रमते जलम्। तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते" प्रा० त० उक्ते ६गङ्गाकूलभेदे न० "गङ्गातीरतरङ्गसङ्गतजलैः स्नात्वा हरो नार्चितः" सा० द०। "अशून्यतीरां मुनिसन्निवेशैः" रघुः। "अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि" मनुः।

**तीरग्रह** पु० देशभेदे "तीरग्रहाः शूरसेनाः ईजकाः कन्यकाः गुहाः" भा० भी० ९ अ० जनपदोक्तौ।

**तीरभुक्ति** पु० (त्रिहोत) देशभेदे त्रिका०।

**तीरु** पु० तॄ–बा० कु। शिवे "नमस्तेऽभीषुहस्ताय तीरुभीरुहराय च" हरिवं० २७८ अ०। शिवस्तुतौ।

**तीर्ण** त्रि० तॄ–क्त। १ उत्तीर्णे, २अभिभूते, ३आप्लुते च। "तीर्णो हि तदा भवति" श्रुतिः "तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैलाः नाक्रान्ता वा कति वनभुवः क्रूरसञ्चारघोराः। पापैरेतैः किमिव दुरितं कारितो नास्मि कष्टं यद्दृष्टास्ते धनमदमसीम्लानवक्त्रा दुरीशाः"।

**तीर्णपदी** स्त्री तरतेः कर्त्तरि क्तः। तीर्णः पादो मूलमस्याः अन्त्यलोपः कुम्भपद्या०ङीपि पद्भावः। तालमूल्याम् शब्दच०

**तीर्णा** स्त्री प्रतिष्ठाख्यवृत्तिविशेषे यथा "यस्मिन् वृत्ते कर्णः कर्णः वेदैर्वर्णैः सा स्यात् तीर्णा" अस्याः कन्येत्यपि संज्ञा। "ग्मौ चेत् कन्येति" लक्षणात्।

**तीर्थ** न०तॄ–थक्। १शास्त्रे २यज्ञे ३क्षेत्रे ४उपाये ५नारीरजसि ६अवतारे ७ऋषिजुष्टजले ८पात्रे ९उपाध्याये १०मन्त्रिणि च मेदि०। ११योनौ १२दर्शने १३घट्टे हेमच०। १४विप्रे १५ आगमे १६निदाने १७वह्नौ च संक्षिप्तसा०। तीर्थं त्रिविधम् जङ्गमं१ मानसं२ स्थावरं३ च। तथा हि "ब्राह्मणा जङ्गमं तीर्थं निर्मलं सार्वकामिकम्। येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनाजनाः। अगस्तिरुवाच। शृणु तीर्थानि गदतो मानसानि ममानघे!! येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम्। सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः। सर्वभूतदयातीर्थं सर्वत्रार्जवमेव च। दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते। ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता। ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यं तीर्थमुदाहृतम्। तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः परा। एतत्ते कथितं देवि! मानसं तीर्थलक्षणम्।